ज्यपरे – [1]जु इति सौत्रोऽयं धातुः । [2]जिजावयिषति । [3]एतदेव [4]पुयण्ज्यपरे इति वचनं ज्ञापकम्, अद्विर्वचननिमित्तेऽपि णौ [5]स्थानिवद् भवति इति । ओः इति किम् ? पापच्यतेः सन् – पापचिषते । पुयण्जि इति किम् ? अवतुतावयिषति । जुहावयिषति । अपरे । इति किम् ? बुभूषति ॥

## स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा । (८१/२६७८)

स्रवति शृणोति द्रवति प्रवति प्लवति च्यवति इत्येतेषाम्[6] अभ्यासस्य [7]ओः अवर्णपरे यणि वा इकारादेशो भवति सनि परतः । सिस्रावयिषति, सुस्रावयिषति । शृणोति – शिश्रावयिषति, शुश्रावयिषति । द्रवति – दिद्रावयिषति, दुद्रावयिषति । प्रवति – पिप्रावयिषति, पुप्रावयिषति । प्लवति – पिप्लावयिषति, पुप्लावयिषति । च्यवति – चिच्यावयिषति, चुच्यावयिषति । वचनसामर्थ्यादेकेन वर्णेन यणो व्यवधानमाश्रीयते । पूर्वसूत्रेण तु अनन्तर एव यणि भवितव्यम् इति अप्राप्तविभाषेयम् । अपरे इत्येव, सुस्रूषति । [8]शुश्रूषते ॥

## गुणो यङ्लुकोः । (८२/२६३०)

यङि यङ्लुकि च इगन्तस्य अभ्यासस्य गुणो भवति । चेचीयते । लोलूयते[9] । यङ्लुकि – [10]जोहवीति । [11]यङो वा इति इड्विकल्पः । चोक्रुशीति ॥

## दीर्घोऽकितः । (८३/२६३२)

अकितोऽभ्यासस्य [12]दीर्घो भवति यङि यङ्लुकि च[13] । पापच्यते । पापचीति । [14]यायज्यते । यायजीति । अकितः इति किम् ? यंयम्यते । यंयमीति । रंरम्यते । रंरमीति । ननु चात्र अपवादत्वान्[15] नुकि कृते अभ्यासस्य अनजन्तत्वादेव दीर्घत्वं न[16] भविष्यति ? एवं तर्हि अकितः इत्यनेन[17] एतज् ज्ञाप्यते, 'अभ्यासविकारेष्वपवादा नोत्सर्गान् विधीन् बाधन्ते' (व्या. प. २३) इति । किमेतस्य ज्ञापने प्रयोजनम् ? डोढौक्यते इत्यत्र 'दीर्घोऽकितः' इत्यनेन सन्ध्यक्षरह्रस्वो न बाध्यते, अचीकरत् इत्यत्र 'दीर्घो लघोः' (७.४.९४/२३१८) इत्यनेन सन्वदित्वं न बाध्यते, मान्प्रभृतीनां दीर्घेण सनीत्वं न बाध्यते – मीमांसते, 'ई च गणः' (७.४.९७/२५७३) इतीत्वेन हलादिशेषो न बाध्यते – अजीगणत् ॥

## नीग् वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् । (८४/२६४२)

वञ्चु स्रंसु ध्वंसु भ्रंसु कस पत पद स्कन्द इत्येतेषाम् अभ्यासस्य नीगागमो भवति यङि यङ्लुकि च[18] । वञ्चु–वनीवच्यते । वनीवञ्चीति । स्रंसु – सनीस्रस्यते । सनीस्रंसीति । ध्वंसु – दनीध्वस्यते । दनीध्वंसीति । भ्रंसु – [19]बनीभ्रस्यते । [20]बनीभ्रंसीति । कस – चनीकस्यते । चनीकसीति । [21]पत – पनीपत्यते । पनीपतीति । पद – पनीपद्यते । पनीपदीति । स्कन्द – चनीस्कद्यते । चनीस्कन्दीति ॥

---

1. वाक्यमिदं नास्ति इ. 2. जिजविषति ब. 3. एतदेव–जुहावयिषति नास्ति क. 4. ओः इत्यधिकम् ब. ड. 5. कृतम् इत्यधिकम् ड. 6. अङ्गानाम् इत्यधिकम् इ.ह. 7. ओः अवर्णपरे यणि वा नास्ति क, ओः अवर्णपरभूते इ. 8. नास्ति ब. 9. पोपूयते इ. ह, नेनीयते नोनूयते ड. 10. बोभवीति ह. 11. वाक्यमिदं नास्ति ब.इ.ह. 12. दीर्घ आदेशः इ. 13. परतः इत्यधिकम् ब. 14. पापठ्यते पापठीति ब. 15. तथा च इत्यधिकम् ह. 16. भवति क. 17. एवम् क. 18. परतः इत्यधिकम् इ. ह. 19. बनीभ्रश्यते इ. 20. बनीभ्रंशीति इ. 21. पत नास्ति इ.